# *महाकवेः जयशङ्करप्रसादस्य कामायनीमहाकाव्ये वेदमूलकता*

*डा. कपिलदेवपाण्डेयः*

महाकविः जयशङ्करप्रसादो बहुभिर्वादैर्विभक्तस्य हिन्दीसाहित्यस्य छायावादिषु कविषु प्रमुखतमं स्थानं भजते इति नास्त्यविदितं केषाञ्चिदपि हिन्दीसंस्कृतादिसाहित्यरसास्वादनरसिकानां सहृदयानाम्। तेन विरचिता नव पद्यकाव्यकृतयः सन्ति–आँसू, लहर, झरना, महाराणा का महत्त्व, वरुणालय, चित्राधार, प्रेमपथिक, काननकुसुम, कामायनी च, यासां माध्यमेन कवेः विविधानि वैशिष्ट्यानि तासामुपरि वैदिकाः प्रभावाश्च समीक्षितुं शक्यन्ते। अत्र प्रस्तुते निबन्धे कामायनीमहाकाव्यमधिकृत्य वेदपुराणादिमूलकता तस्य विमृश्यते। महाकवेः प्रसादस्य काव्यरचनासु छायावादस्य केन्द्रीयाः भावपक्षाः प्रेमसौन्दर्यादयः स्फुटमभिव्यज्यन्त एव, अध्यात्मभावोऽपि सूक्ष्मरूपेण यथावसरं विकीर्णोऽवलोक्यते। जयशङ्करप्रसादः एकतो भारतीयसंस्कृतेर्निपुणश्चित्रकारोऽपरतश्च दार्शनिकः काव्यकलाकारोऽस्ति। तेन प्रणीतस्य कामायनीमहाकाव्यस्य सन्देशः शैवागमस्य विशेषतः प्रत्यभिज्ञादर्शनस्य विवृतिरूपोऽस्ति यन्माध्यमेन सामरस्यसिद्धान्तस्य महाचितेः स्वरूपस्य च स्थापना कृतास्ति। प्रसादो वस्तुतस्तामव्यक्तसत्तां प्रति स्वकृतिषु जिज्ञासमानोऽवलोक्यते या कृत्स्नायाः सृष्टेर्मूले विद्यमाना वर्तते।

आर्यसाहित्ये मानवजातेराद्यपुरुषस्य मनोरितिहासो वैदिकवाङ्मये पुराणेषु इतिहासग्रन्थेषु च विविधरूपेण आख्यानोपाख्यानरूपेण च विकीर्णोऽस्ति। प्राचीनाख्यानेषु मनोः श्रद्धायाः इडायाश्च कथा अतीव मार्मिकी सरसा चास्ति। तत्र मनोः कथायां पुराणेषूल्लिखितस्य मत्स्यावतारस्य बीजं विद्यते। **शतपथब्राह्मणे**[1] सर्वाधिकं रोचकमुपाख्यानं जलप्लावनस्य कथाऽस्ति यया ज्ञायते केन विधिना प्रलयकाले मनुर्मत्स्यस्य साहाय्येन मानवीं सृष्टिं ररक्ष यतोऽवशिष्टबीजैर्यज्ञद्वारा भूतले मानवजातेः प्रादुर्भावोऽभूत्। मनुः देवजातेरन्तिमो मानवजातेश्चादिमः पुरुषोऽस्ति। देवजातिः समृद्धिसम्पन्नाऽसीत्। तेषु देवेषु अपारशक्तेः सद्भावात् वैभवस्य भोगजन्यसुखस्य आनन्दस्य च परिपूर्णता आसीत्। अतस्तेषां स्वभावः उच्छृङ्खलः आत्मतुष्टिपरश्चासीत्। अहङ्कारात् रात्रिन्दिवं सुरबालाभिः सह शृंगारसुरापानादिषु निमग्नत्वात् तेषां नाशोऽभवत्।

मनुश्चिन्तयन् कथयति—

**'उसी वासना की उपासना,**
**वह तेरा प्रत्यावर्तन।'**

× × ×

**''देवदम्भ के महामेध में**
**सब कुछ ही बन गया हविष्य।।''**[2]

प्रलयानन्तरं श्रद्धायाः मननस्य च समन्वयेन एको नवीनो युगः प्रारभत। मन्वन्तरस्यास्य प्रवर्तको मनुरभवत्। **श्रीमद्भागवतपुराणे** स श्राद्धदेवशब्देन व्यपदिष्टोऽस्ति—

**'ततो मनुः श्राद्धदेवः संज्ञायामास भारत।**

× × ×

**तत्र श्रद्धा मनोः पत्नी होतारं समयाचत।**[3]

एष खलु वैवस्वतो मनुरासीत्। **श्रीमद्भागवते** वैवस्वतमनोः श्रद्धायाश्च मानवसृष्टेः प्रादुर्भावो वर्णितोऽस्ति।[4] ऋग्वेदे श्रद्धायाः मनोश्च ऋषिरूपेणोल्लेखोऽस्ति। तत्र श्रद्धासूक्ते सायणेन स्वभाष्ये श्रद्धायाः परिचयो

दत्तोऽस्ति–'**कामगोत्रजा श्रद्धा नामर्षिका।**'[5] तथा चानुक्रम्यते–'**श्रद्धाया श्रद्धा कामायनी....**'। अतएव तस्याः श्रद्धाया अपरं नाम कामायनी अपि कथ्यते। (काम + गोत्रप्रत्ययः → फक् आयन + ङीप्)।

जलप्लावनसन्दर्भे मनुमत्स्यकथा विमर्शकोटिमाटीकते। इयं कथा **मत्स्यपुराणस्य** प्रथमेऽध्याये प्रारम्भे एव सविस्तरं वर्णितास्ति। कदाचित् पितृतर्पणं कुर्वाणस्य मनोरञ्जलौ एको मत्स्यः पपात। प्राह चासौ मनुं ''**पाहि, मां पाहीति**''। सशैलवनकानना मही अचिरेणैव कालेन प्रलयपयोधौ निमग्ना भविष्यति। जीवसमूहस्य रक्षणार्थमियं नौका देवैर्निर्मितास्ति। अस्यां सर्वान् जीवान् निधाय त्वमिमान् रक्ष। नौरियं यदा युगान्तवाताहता भविष्यति, तदा त्वमिमां मम शृङ्गे संयमिष्यसि। ततो प्रलयान्ते सर्वस्य जगतः प्रजापतिः कृतयुगस्यादौ मन्वन्तराधिपश्च त्वं भविष्यसि।''[6] मनुद्वारा नौकाबन्धनस्य स्थानं **शतपथब्राह्मणे** 'मनोरवसर्पण' नाम्ना अभिहितमस्ति। **महाभारते** 'नौबन्धनम्' **भविष्यपुराणे** 'शिषिणा' इत्यस्य नामनी वर्तेते। घटनेयं हिमालये संघटिता–

**हिमगिरि के उत्तुङ्ग शिखर पर**
**बैठ शिला की शीतल छाँह।**
**एक पुरुष भीगे नयनों से**
**देख रहा था प्रलयप्रवाह।।**[7]

**शतपथब्राह्मणे** प्रलयकाले महावटे नौकाबन्धनस्य, महाभारते प्रलयकाले महावटोऽवशिष्टो, न नष्टः इत्यस्योल्लेखोऽस्ति।

**बँधी महावट से नौका थी, सूखे में अब पड़ी रही।**
**उतर चला था वह जलप्लावन, और निकलने लगी मही।।**[8]

**कामायनीमहाकाव्यस्य** कथावस्तु वेदेषु, पुराणेषु ब्राह्मणग्रन्थेषु तथा अन्येषु प्राचीनभारतीयसाहित्यग्रन्थेषु लभ्यत इति मया पूर्वं संकेतितम्। तथा हि तपस्विनो मनोः, पशुबलिरूपहिंसारतयजमानस्य च मनोर्वृत्तं **ऋग्वेदे** वर्तते। नियामकस्य प्रजापतेः मनोः कथा श्रद्धाया इडायाश्च कथा **ऋग्वेदे, शतपथब्राह्मणे** पुराणेषु च वर्तते। जलप्लावनस्य, मानवसृष्टेः, श्रद्धामन्वोः प्रणयस्य च विवरणं यत्र तत्र अग्नि-मार्कण्डेय-मत्स्य-भागवत-हरिवंशपुराणेषु सुविशदं लभ्यते। **छान्दोग्योपनिषदि**[9] **त्रिपुरारहस्ये** च श्रद्धाया भावमूलिका व्याख्या कृतास्ति। महाकाव्यस्यान्तिमे सर्गत्रये दर्शने, रहस्ये, आनन्दे च शैवागमस्य प्रत्यभिज्ञादर्शनस्य प्रभावः स्फुटं परिलक्ष्यते। निष्कर्षतः कामायन्याः कथायाः मूलाधारग्रन्थाः **ऋग्वेदः, शतपथब्राह्मणं, श्रीमद्भागवतं, मत्स्यपुराणं** च सन्ति।

**छान्दोग्योपनिषदि**[10] पुरुषस्य ब्रह्मणा वेदेन वा सह साम्यं कृतमस्ति। **शतपथब्राह्मणे** पुरुष एव प्रजापतिरित्युल्लेखोऽस्ति[11]। सामान्यतः एकस्माद् आदिपुरुषात् मानवजातेरुत्पत्तिः मता, यः खलु विवस्वतः पुत्रो मनुरासीत् यश्च प्रथमो यज्ञानुष्ठाताऽभवत्[12]। शतपथब्राह्मणे वर्णितो महामत्स्यो यः प्रलयजलौघात् मनोरुद्धारं कृतवान् स महाभारते प्रजापतिरूपेण पुराणेषु च विष्णोरवताररूपेण वर्णितोऽस्ति। मनुः इडानाम्नीं पुत्रीमुत्पाद्य मानवजातेः प्रथमसन्ततेः जनकोऽभवत्, या तस्यैव हविषः उदपद्यत। इयमथर्वसंहितायामपि वर्णितास्ति[13]। कन्यारूपेण इडाया नाम **श्रीमद्भागवतेऽपि** उल्लिखितमस्ति–''**कन्येडा नाम साऽभवत्**''[14]। डलयोरभेद इति नियमेन कुत्रचित् 'इला' इति पाठोऽपि लभ्यते। दुग्धघृतरूपहविषो मूर्तीकरणप्रक्रियया इडायाम् गोत्वारोपस्य प्रवृत्तिरप्यस्ति।

विण्टरनित्जमहोदयानां मतेन जलप्लावनस्य कथाया मूलं स्रोतः सेमेटिकपरम्पराऽस्ति। अवेस्ताग्रन्थेऽपि कथेयं प्राप्यते। मेसोपोटामिया-सुमेरिया-बेबीलोनिया-असीरिया-यहूदी-यवनानां पुराकथास्वपि लब्धस्थानेयं कथा। बाइबिल-कुरान-बेदियादप्रभृतिष्वपि प्रलयस्य घटनाया उल्लेखो वर्तते। अस्य विस्तृतं वर्णनं डा. सम्पूर्णानन्देनापि

कृतमस्ति। बालगंगाधरतिलकमहोदयोऽवेस्तायां वर्णिताया: ब्राह्मणग्रन्थेषु वर्णितायाश्चास्या: कथाया: समरूपतां मन्यते।

**कामायनी** एकं विलक्षणमनितरसाधारणं च महाकाव्यमस्ति। प्राचीनेऽस्मिन्नाख्याने इतिहासस्य रूपकस्य च अद्भुतं सम्मिश्रणं जातमस्ति। अत एवास्य मनु:, श्रद्धा इडा चेति पात्राणि ऐतिहासिकमस्तित्वं बिभ्राणान्यपि किमपि मनोभावमूलकं सांकेतिकमर्थमपि अभिव्यञ्जयन्ति। मनो: अर्थात् मनस: पक्षद्वयस्यापि हृदयमस्तिष्कयोश्च सम्बन्ध: क्रमश: श्रद्धया इडया च सहजतया सञ्जायते। स सम्बन्धश्चात्र औचित्यमावहति। एवम्प्रकारेण कामायन्या: कथानके रूपकात्मकता प्रतीकात्मकता वान्वेष्टुं शक्यते। संस्कृतप्रतीकनाटकवत् (like Allegorical dramas) कामायनीमहाकव्यस्यापि अमूर्तानि पात्राणि मूर्तरूपेण कल्पनया प्रतीकतां प्राप्तानि सन्ति। अस्य सर्गाणां नामानि (chapters) एवंविधा: मानसिकवृत्तीराश्रित्य कृतानि सन्ति। कवे: प्रसादस्योद्देश्यं सूक्ष्मं मनोजगत् प्रतिष्ठापयितुमस्ति इति स्फुटं प्रतिभाति।

महाकाव्यस्यास्य प्रथम: सर्ग: चिन्ताऽस्ति। भयजन्या चिन्तावृत्तिर्मनुष्यस्य चेतनाशक्तिरस्ति या मनुष्यजातिं पशुजाते: पृथक् करोति तां रचनात्मकतां प्रति प्रेरयति च। दीर्घोच्छ्वास-हृदयशून्यता-मलिनता-अधैर्य प्रभृतयश्चिन्तासूचिका: चेष्टा: भवन्ति इति तथ्यं भरतनाट्यशास्त्रे तां व्यभिचारिभावं मत्वा प्रस्तुतीकृतमस्ति। वस्तुतस्तु करुणेव चिन्तापि मनुष्यस्य स्थायिमनोवृत्तिरस्ति। मनु: कथयति यदहं स्वकीयवैभवपूर्णे अतीतविषये यावच्चिन्तां करोमि तावदेव मम हृदयं दु:खविग्नं भवति—

**'चिन्ता करता हूँ मैं जितनी, उस अतीत की, उस सुख की।**
**उतनी ही अनन्त में बनती जातीं रेखायें दु:ख की।।'**[15]

फ्रायडमहोदयानुसारेण ज्ञातापद: प्रतिक्रिया भयरूपेण अज्ञातापद: प्रतिक्रिया चिन्तारूपेण भवति। कविप्रसादेन एतेषां समेषां समाहार: चिन्तासर्गे काव्यकौशलेन कृतोऽस्ति। चिन्तानन्तरं मनुष्यं कर्मक्षेत्रे प्रवर्तयन्ती एका अपरा वृत्ति: 'आशा' भवति, या काव्यस्य द्वितीय: सर्गोऽस्ति। चिन्तेव इयं दु:खमूलिका नास्ति, अपितु सुखात्मिका विकासोन्मुखी च वृत्तिरस्ति। आशावृत्तेरनन्तरं जीवनस्य मूलतत्त्वरूपेण श्रद्धावृत्तिरुपतिष्ठते, या काव्यस्यास्य तृतीयो मेरुदण्डभूतश्च सर्गोऽस्ति। कविनाऽत्र भारतीयनारीणां सम्पूर्णा: आदर्शभूता: गुणा: समाहिता:। सर्गारम्भे श्रद्धा मनुमाकर्षणजन्यकुतूहलेन पृच्छति—

**कौन तुम संसृति-जलनिधितीर**
**तरंगों से फेंकी मणि एक।**
**कर रहे निर्जन का चुपचाप**
**प्रभा की धारा से अभिषेक।।**[16]

श्रद्धासर्गे मुख्यतया वैशिष्ट्यद्वयं वर्तते-श्रद्धाया रूपसौन्दर्यस्य चित्रणं श्रद्धाद्वारा मनवे जीवनसन्देशप्रदानञ्च। महाकाव्यस्य नायिका श्रद्धैवास्ति। सा मनवे कामस्य इच्छायाश्च प्रेरणां ददती कथयति—

**काम मंगल से मण्डित श्रेय सर्ग इच्छा का है परिणाम।**
**तिरस्कृत कर उसको तुम भूल, बनाते हो असफल भवधाम।।**[17]

तत एव कामस्य मङ्गलमयत्वादेव चतुर्थ: सर्ग: प्रवर्तते। काम:श्रद्धया सह सम्भूय मनुं सृष्टिनिर्माणाय तद्विकासाय च प्रवर्तयति। कामविषयिणी इयं परिकल्पना वैदिके बौद्धे च दर्शने लभ्यते। कामो मनुष्यस्य सर्वासां विकासोन्मुखीनां प्रवृत्तीनां मूलं मन्यते। कामायनी (श्रद्धा) च एतैरेव गुणै: सम्पृक्ता वर्णिता कविना प्रसादेन।

तत: परं वासना-लज्जा-कर्म-ईर्ष्या-इडाप्रभृतिषु सर्गेषु कविप्रसादेन नारीपुरुषयोश्चित्तमध्ये जायमाना:विविधा:

वृत्तयो व्यवहाराश्च विवेचिता: सन्ति। लज्जा नारीणां सा वृत्ति: या पुरुषाय समर्पणानन्तरं ताभिरनुभूयते। समर्पणविषये 'लज्जा' श्रद्धां प्रति व्याहरति—

**नारी तुम केवल श्रद्धा हो, विश्वास रजत नगपगतल में।**
**पीयूष स्रोत-सी बहा करो, जीवन के सुन्दर समतल में॥**[18]

लज्जामनोभावस्य मानवीकरणद्वारा कविना नार्या: महिममण्डितस्वरूपस्य चित्रणं कृतिमस्ति लज्जासर्गे। वासनायास्तुष्टये मनुष्य: कर्मणि प्रवृत्तो भवति, बहुविधं हिंसात्मकं कर्म कर्तुं यतते च। तत्र बाधकतत्त्वेष्वापतितेषु ईर्ष्योत्पत्ति: स्वाभाविकी। ततो मनुष्यो हृदयतत्त्वरूपां श्रद्धां परित्यज्य बुद्धिक्षेत्रे प्रवेशं करोति। तत: सङ्घर्षोत्पत्तिर्भवति। बौद्धिकादतिवादात् सङ्घर्ष: ततो पराजयस्तज्जन्यं दु:खं च भवति। दु:खानुभवकाले निर्वेदोदयो भवति। तदैव तस्य जीवनस्य वास्तविकताया दर्शनं भवति। दर्शनस्य रहस्यस्य च बोधान्तरमानन्दानुभूतिर्भवति। तेन जीवने सामरस्यं भवति। एवं कविवरेण प्रसादेन महाकाव्येऽस्मिन् मानवमनसो विविधवृत्तीनां यथार्थरूपेण साङ्गोपाङ्गं वर्णनं कृतमस्ति। एतादृशं मनुष्यमनोजगतो मनोवैज्ञानिकं विश्लेषणं काव्यात्मकं निरूपणं च हिन्दीसाहित्ये अन्यत्र दुर्लभमस्ति। कामायन्यां मनो:कथा श्रद्धया इडया च सह चिन्तात: प्रारभ्य आनन्दे पर्यवस्यति। महाकाव्यमिदं मनुष्यस्य क्रियात्मक-बौद्धिक-भावनात्मकविकासे सामञ्जस्यस्थापनाय अपूर्वोऽयं काव्यात्मक: प्रयासोऽस्ति। कथाया: मूलं वैदिकवाङ्मयाद् गृहीत्वा पुराणादिसहकारेण समुपबृंहणं विधाय च दर्शनादृशा तत्रापि प्रत्यभिज्ञादर्शनाभिज्ञानेन महाचिते: फलम् 'आनन्दं' प्रापयति मनुं श्रद्धा। प्रसादेन आनन्दवादस्य स्थापनासन्दर्भे उपनिषदामाश्रयो[19] गृहीत:। एवं कामायनीमहाकाव्यस्य वेदमूलकतां प्रदर्श्य विरम्यते। इति शम्।

**संदर्भ:**


1. 'मनवेह वै प्रात:' शतपथब्राह्मणम् 1.8.1
2. कामायनी, चिन्तासर्ग: 20-21
3. श्रीमद्भागवतपुराणम् 9.1.12
4. तदेव, 8.24.58
5. श्रद्धासूक्तम्, (ऋग्वेदे 10.151.1-5)
6. मत्स्यपुराणम्, अध्याय: 1, श्लोक 11-17
7. कामायनी, चिन्ता 1
8. तदेव, चिन्ता 8
9. 'श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास', छान्दोग्य. 7.19.1
10. तदेव, 1.7.5
11. शतपथब्राह्मणम् 11.1.6.1
12. तदेव, 1.8.1.1
13. अथर्वसंहिता 19.39.8
14. श्रीमद्भागवतपुराणम् 9.1.16
15. कामायनी, चिन्तासर्ग: 18
16. तदेव, श्रद्धासर्ग: 1
17. तदेव, श्रद्धासर्ग: 36
18. तदेव, लज्जासर्ग: 41
19. 'आत्माऽऽनन्दमय:', तैत्तिरीयोपनिषद् 2.6


* * *